# Shri Gurucharitra Adhyaya Saramsha Shlokas

# શ્રીગુરુચરિત્રાધ્યાયસારાંશશ્લોકાઃ

## Document Information

Text title : Shri Gurucharitra Adhyaya Saramsha Shlokas

File name : gurucharitrAdhyAyasArAMshashlokAH.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીગુરુચરિત્રાધ્યાયસારાંશશ્લોકાઃ

અધ્યાયે પ્રથમ ઇહેષ્ટવન્દનાખ્યં
પ્રોક્તં મઙ્ગલમથ નામધારકાખ્યમ્ ।
પ્રાપ્યેષ્ટં સ્તુત ઇહ ધામ હર્ષણીયં
દત્તોઽદર્શયદુ તનુઃ પ્રહર્ષિણીયમ્ ॥ ૧॥

સિદ્ધઃ સૃષ્ટિયુગસ્થિતીરિહ જગૌ સર્ગે દ્વિતીયે વિધેઃ ।
સંવાદં કલિના ચ દીપકગુરૂપાખ્યાનકં સદ્વિધેઃ ॥

યચ્ચાકારિ હિ દીપકેન ગુરુસત્સેવાખ્યવિક્રીડિતમ્ ।
કુર્યાત્કોઽત્ર તથા કરોત્યપિ શશઃ શાર્દૂલવિક્રીડિતમ્ ॥ ૨॥

તૃતીયેઽધ્યાયેઽમ્ભોનશનમિતિ મૌનૈઃ પ્રથમતોઽ-
મ્બરીષોપાદ્વિષ્ણુવ્રતહતિભિયા વૈષ્ણવમતઃ ।
વ્રજાનેકા યોનીરિતિ શપતિ દુર્વાસસિ હરિ-
સ્તમાદાચ્છાપં યન્નિજસહનતાભૂચ્છિખરિણી ॥ ૩॥

તુર્યે ત્રીશાઃ સત્વહૃત્યૈ યથાન્નં
સ્મેહન્તેઽદાચ્ચાનસૂયા તથાન્નમ્ ॥

બાલા ભૂત્વા દુગ્ધમસ્યાઃ પપુસ્તે
યત્કીર્તિદિક્શાલિની સર્વદાઽઽસ્તે ॥ ૪॥

દત્તાય દદૌ દ્વિજાઙ્ગનાન્નં શ્રાદ્ધાત્પુરતઃ સ પઞ્ચમેઽભૂત્ ।
શ્રીપાદાભિધઃ સુતોઽન્ધપઙ્ગૂદ્ધૃદ્ભદ્રવિરાડભૂત્પરિવ્રાટ્ ॥ ૫॥

શિવો દશાસ્યાય દદૌ સ્વલિઙ્ગં
પ્રગૃહ્ય તસ્માદ્ગણપતસ્તતસ્તત્ ॥

ઉપેન્દ્રવજાસ્ત્રમુખેરિતઃ કૌ
મહાબલેશં નિદધૌ સ ષષ્ઠે ॥ ૬॥

ભૂપેન્દ્રવંશોન્નતયેઽત્ર સપ્તમે
ગોકર્ણમાહાત્મ્યમુવાચ ગૌતમઃ ॥

તદ્બ્રહ્મહત્ત્યાલયકૃદ્ગતિં વદન્
ચણ્ડાલિકાયાઃ પ્રશશંસ ભૂભતે ॥ ૭॥

સકુસુતવિધવા સા મર્તુકામા પ્રદોષ-
વ્રતકથનત ઈશસ્તાન્નિવર્ત્યાષ્ટમેઽન્તાત્ ॥

સ વિબુધમકરોત્તજ્જં ચ જન્માન્તરેઽસ્યાઃ
સુત ઇહ ભવિતા દિઙ્માલિની યસ્ય કીર્તિઃ ॥ ૮॥

આખ્યાનકીર્તિશ્રુતિતોઽસ્ય મુક્તિર્ભવાન્તરેઽસૌ રજકાય રાજ્યમ્ ।
દાસ્યન્તિરોભૂન્નવમેઽત્ર કૃષ્ણાતટેઽપિ સમ્પૂરયતિ સ્વતૃષ્ણામ્ ॥ ૯॥

પથિ તસ્કરઘાતિતભક્તં સાર્થમજીવયદેત્ય ચિરસ્ય ।
વિનિહત્ય ચ તાન્દશમે શ્રીપાદાતિવેગવતી ગતિરસ્ય ॥ ૧૦॥

એકાદશે નૃહરિસંજ્ઞક આસ સોઽમ્બા-
પુત્રઃ પ્રદોષફલદઃ પ્રણવં પઠિષ્યન્ ॥

ભૂત્વાપ્યવાક્શ્રુતિગણાનુપનીત ઊચ
ઉદ્ધર્ષણીં સ્વજનનીં બહુધા પરિષ્યન્ ॥ ૧૧॥

માણવક્રાક્રીડિતકૃદ્દ્વાદશ આશ્વાસ્ય વિભુઃ ।
માતરમેત્ય ચ કાશીં ન્યાસ્યભવત્સ નિરાશીઃ ॥ ૧૨॥

પ્રસૂમુખૈર્જનિભુવિ સઙ્ગતઃ સ્વકૈ-
સ્ત્રયોદશેઽનુગયુગુપેત્ય ગૌતમીમ્ ॥

મૃતોત્સુકં જઠરરુગાર્તમુદ્ધરન્
વ્યદર્શયદ્ ભુવિ રુચિરાં પ્રભુર્ગતિમ્ ॥ ૧૩॥

સાયન્દેવં શક્રમિતાધ્યાય ઉવાચ
ત્રીશો મ્લેચ્છં યાહિ ન ભીસ્તે સ તથેતિ ॥

ગત્વા ભીતમ્લેચ્છનૃપેણાર્ચિત એત્ય નૃત્યન્
રેજે મત્તમયૂરો હિ યથા સઃ ॥ ૧૪॥

ચિત્રપદોક્તિત ઈશસ્તીર્થગમાય સ શિષ્યાન્ ।
પઞ્ચદશે કથયિત્વા તદ્વિધિમીરયદેવ ॥ ૧૫॥

ષોડશે ગુરુરથોદ્ધૃતાત્મને ધૌમ્યશિષ્યચરિતોપદેશતઃ ।
બ્રાહ્મણાય વિદમર્પયદ્ ગુરુદ્રોહિણેઽલમનુતપ્તચેતસે ॥ ૧૬॥

આર્યાવમાનિતોઽદદાદાર્યાયૈ મૂઢવિપ્ર ઇહ જિહ્વામ્ ।
સપ્તદશે તત્પ્રેરિત ઈશમવાપ્યાલભત્તતો જિહ્વામ્ ॥ ૧૭॥

ભિક્ષાર્થં ગત્વા કુસુમિતલતાવેલ્લિતદ્વારદેશં
ગેહં વિપ્રસ્ય પ્રભુરતિદરિદ્રસ્ય ભુક્ત્વાપિ શાકમ્ ॥

છિત્વા વલ્લીં સ્વવસતિમગાત્તલ્લતામૂલદેશે
લેભેઽર્થૌઘં દ્વિજવર ઇહાષ્ટાદશે ચાશિષોઽપિ ॥ ૧૮॥

અમરાપૂર ઊનવિંશકેઽનુગગઙ્ગાનુજપા ઉદુમ્બરે ।
વરદે સ નિધાય પાદુકે ગુરુરાશ્વાસ્ય ચ યોગિનીરગાત્ ॥ ૧૯॥

પ્રેતાર્તિહૃતાઽર્ભૌ દત્તૌ મૃત એકઃ ।
વણ્યાર્પતદમ્બાં વિંશે તનુમધ્યામ્ ॥ ૨૦॥

વિદ્યુન્માલાવત્સમ્બન્ધં પુત્રાદેઃ સન્ ચોક્ત્વા બોધમ્ ।
સત્યૈ ચક્રે જીવોપેતં સૈકે વિંશેઽસૌ તત્પોતમ્ ॥ ૨૧॥

ગન્ધર્વં પ્રાપ્ય ભીમામરદુહિતૃયુતિં ભિક્ષાર્થમથ ગુરુ-
ર્ગત્વા દીનદ્વિજૌકો ગતરદમહિષીં વન્ધ્યાં ભરવહામ્ ॥

દૃષ્ટ્વા દુગ્ધં યયાચે તદનુ સુવદના સ્ત્રીઃ ક્ષીરમદુહદ્વા
ઇંવશેઽદાત્પયોઽસ્મૈ તદુ વરદગુરુઃ પીત્વાગમદસૌ ॥ ૨૨॥

રાટ્ ત્રયોવિંશ આકર્ણ્ય સત્તદ્યશઃ
સ્રગ્વિણીં સ્વાં પુરીમાનયત્તદ્વશઃ ॥

શ્રીગુરૂ રક્ષસેઽદાદ્ગતિં રાજવદ્રાજદત્તે
મઠે વિશ્વવાસોઽવસત્ ॥ ૨૩॥

નિન્દાકર્તૃયતિત્રિવિક્રમં પ્રાપ્ય શ્રીગુરુરાશ્વદર્શયત્ ।
સૈન્યં ન્યાસિવપુઃ ક્ષણં ચતુર્વિંશે યાનગરાજવદ્વિરાટ્ ॥ ૨૪॥

મત્તાવાપ્તૌ શ્રુતિનયવિજ્ઞૌ મ્લેચ્છાજ્ઞાપ્તૌ દ્વિજવિજિગીષૂ ।
ભિક્ષુર્નિન્યે શ્રિતશિબિકૌ તૌ ગુર્વગ્ર્યં પઞ્ચસહિતવિંશે ॥ ૨૫॥

ચિત્રપદોક્તિભિરીશઃ ષડ્યુતવિંશ ઉવાચ ।

વેદતદઙ્ગવિશાખા યં પ્રણમન્તિ હિ લેખાઃ ॥ ૨૬॥

અપિ ક ઇહ યદીક્ષણાદપરાજિતાઃ
સ બુરુડવદનાચ્છ્રુઇઈઃ સમવાચયત્ ॥

અનયદ્ભુમિતે દ્વિજૌ ચ પિશાચતાં
સુગતિમથ ગતૌ ચ તૌ દ્વિષડદ્ધતઃ ॥ ૨૭॥

અકથયદસાવિષ્ટાવિંશે સ્વકર્મવિપાકતો
વિવિધકુગતિં હીનત્વાપ્તિ સચિહ્નપુનર્ભવમ્ ॥

તદઘહૃતયે પ્રાયશ્ચિત્તં ચ કૃચ્છ્રજપાદિકં
પતિતમકરોદ્ ભૂયોઽઙ્ગં સા મનોહરિણી કથા ॥ ૨૮॥

નવદ્વયયુતે નતેન મુનિના સ પૃષ્ટોઽવદત્
વિભૂતિમહિમાનમાનતપદાસ્રપાયાવદત્ ॥

કુમારહરવાદમપ્યથ સ વામદેવો દદૌ
ગતિં ભસિતધારણેન વિધિવચ્ચ પૃથ્વીધરઃ ॥ ૨૯॥

ગોપીનાથસુતોઽત્રિસુતભજનાત્પુત્રમાપોદ્વહોર્ધ્વં
તત્સ્ત્રી રુગ્ણં તમનયદથો પત્તનં ગાણગાખ્યમ્ ॥।

મન્દાક્રાન્તાધ્વનિ સ તુ પુરસ્યોપકણ્ઠં મમાર
તિંરશે તત્સ્ત્રીનિકટમથ ગતો ભૂતિરુદ્રાક્ષધૃક્સન્ ॥ ૩૦॥

સ્ત્રીધર્મમુવાચ કુપૂર્મિતેઽધ્યાયે ધિષણોક્તમુપસ્થિતામ્ ।
વિન્ધ્યાદ્રિચરિત્રસમન્વિતાઽગસ્ત્યર્ષિસતીચરિતં ચ સન્ ॥ ૩૧॥

રુક્મવતીમૂચે પ્રણતાં તામષ્ટસુતા સૌભાગ્યવતી સ્યાઃ ।
પ્રેતમપિ દ્વાતિંરશ ઇહાસ્યા વલ્લભમાશૂત્થાપયદીશઃ ॥ ૩૨॥

ભુજગશિશુભૃતા નીતા કુલયુગિહ પુરાઙ્ગ્યાઢ્યે ।
સ્વપુરમપિ સતી વેશ્યા તત ઇહ વિકપી ભૂપૌ ॥ ૩૩॥

કૃતકરપુટરાજપ્રાર્થિતર્ષિઃ સુતમૃતિહતયે રુદ્રાભિષેકમ્ ।
શ્રુતિપુરમિતસર્ગેકારયદ્રાટ્તનયમુત મૃતિતોઽજીવયદ્દ્રાક્ ॥ ૩૪॥

સુરહિતદકચકથા વૃત્તા શરપુરમિત ઇહ સોમાખ્યમ્ ।
વ્રતમપિ યત ઇહ સીમન્તિન્ચલભદપિ ચ દયિતં નષ્ટમ્ ॥ ૩૫॥

તર્કપૂર્યુજિ હલમુખી સ્ત્રી સુશિક્ષણમિષત ઈટ્ ।
આહ્નિકાચરણમવદચ્છાક્ત્યસમ્મતમુ સુધિયે ॥ ૩૬॥

પ્રમિતાક્ષરોક્તિગુરુરાહ સુચિરસુરપૂજનાદિસકલાહ્નિકવિત્ ।
અશનાદિધર્મશયનાદિવિધિઃ સ્વરપૂર્મિતેઽત્ર હતભક્તવિધિઃ ॥ ૩૭॥

ત્રિલોકપર્યાપ્તકૃતોદનેન સમ્ભોજિતા વિપ્રમુખા અનેન ।
અષ્ટત્રિયુક્તે હ્યુપજાતયોઽપિ ભક્તાય દત્તો ગુરુણા વરોઽપિ ॥ ૩૮॥

નવત્રિમિતસર્ગે વ્યધાત્સ્થવિરવન્ધ્યામ્ ।
કુમારલલિતાં પિપ્પલાર્ચનત ઈશઃ ॥ ૩૯॥

ખયુગમિતેઽત્ર કુષ્ઠવિનિવૃત્ત્યૈ નરહરયેઽવદત્સમિદર્ચામ્ ।
તદ્ઉ વિટપી દ્વિજશ્ચ શુચિરાસીદિયમજકીર્તિરિન્નવમાલિની ॥ ૪૦॥

અવદદિહ પરીક્ષ્ય સાયન્દેવં કુયુગમિતે ભગવાન્ગુરૂક્તલબ્ધ્યૈ ।
વિધિજમુપગતઃ સુપુષ્પિતાગ્રગમવન આર્ય ઉવાચ કાશીયાત્રામ્ ॥ ૪૧॥

વાતોર્મીતિર્દ્વિયુગાઢ્યે સ સર્ગે શિષ્ટાં યાત્રાં કથયન્દર્શયિત્વા ।
કાશીં દારાદિનુતશ્ચાનયિત્વા સાયન્દેવં ગુરુરાહ વ્રતં સત્ ॥ ૪૨॥

સાયન્દેવાય ત્રિયુગપરિમિતેઽધ્યાયે
પ્રાહેશોઽનન્તવ્રતમિહ ચ પરત્રેષ્ટમ્ ॥

યસ્યાચીર્ણેન વ્યપગતદુરિતો યાયાત્કૌણ્ડિણ્
યઃ પાર્થશ્ચ સુગતિમિતોસમ્બાધામ્ ॥ ૪૩॥

ક્ષણતઃ શ્રુતિવેદસમ્મિતેઽસ્મિન્નનયદ્યતિરાજ એકરૂપઃ ।
શ્ચ્યગમાત્મરતં સ તન્તુકં ચાનયદાશુ નિવેદ્ય રાટ્ચરિત્રમ્ ॥ ૪૪॥

યદ્ધીરાસીદ્ભ્રમરવિલસિતા નન્દ્યમ્બોક્ત્યા કુરુગુપશમધીઃ ।
પ્રાપ્યેશં દ્રાક્સ શુચિકવિરભૂદ્ ગુર્વીક્ષાતોઽક્ષયુગમિત ઇહ ॥ ૪૫॥

સ્વપ્ન ઉપેત્ય સ આદદ ઈશો રસકૃતયુક્ત ઇહાર્ચનમગ્ર્યમ્ ।
કેસરિદત્તમભૂદ્દ્રુતમધ્યાત્મકપદદસ્ય કવિઃ સ ચ શિષ્યઃ ॥ ૪૬॥

દીપાવલ્યાં સમ્પ્રાર્થિતઃ સપ્તશિષ્યૈઃ
સપ્તગ્રામાન્તત્ક્ષેત્રસંસ્થોઽપ્યગાત્સઃ ॥

અષ્ટાત્મા ભૂત્વા સપ્તવેદાઢ્યસર્ગે
લોકે યન્મૂર્તિર્વિશ્રુતા વૈશ્વદેવી ॥ ૪૭॥

ક્ષેત્રં ગુરૂક્તવદશેષમપક્વધાન્યં
ચિચ્છેદ શૂદ્ર ઉપગાં વિનિવારયન્તીમ્ ॥

સિંહોન્નતાક્ષ ઇવ ચાત્મવધૂં નિવાર્ય
લેભેઽમિતર્ધિમિભવેદયુજીશભક્ત્યા ॥ ૪૮॥

સર્ગેઽઙ્કુવાક્સમ્મિત ઇન્દ્રવજ્રાલેપોપમાઘક્ષતિકૃદ્ભગિન્યાઃ ।
તત્ક્ષેત્રમાહાત્મ્યમુવાચ સોઽષ્ટતીર્થાનિ ચાદર્શયદત્ર સદ્ભ્યઃ ॥ ૪૯॥

ખશરયુતે પુરોક્તરજકોઽભવદ્યવનરાજ આસ વૃષકૃત્
પૃથુપિટકસ્તદઙ્ઘ ઉદિતસ્તદીયશમકૃદ્દ્વિજો નૃપકથામ્ ॥

અવદદથો યયૌ સ ગુરું સ્મૃતિં પ્રથમજન્મનોઽલભદથો
ગતરુગસૌ સુયાનગમજં ગજાશ્વલલિતં પુરં સ્વમનયત્ ॥ ૫૦॥

રાજપુરાદેત્ય સ ચ નીજપીઠં કીર્તિરભૂન્મમ સુશુચિરતન્વી
સ્થેયમિહાતઃ પરમિહ ન સાક્ષાદિત્યવનીષુયુજિ સ ચ વિચાર્ય ॥

સ્વાનપિ ચાશ્વાસ્ય બહુવરદાનૈઃ પુષ્પકૃતાસનગત ઇદમાહ
મદ્ભજનાદ્ધઃ સુગતિરિહ તિષ્ઠે સત્યમિતીઽરમભવદદૃશ્યઃ ॥ ૫૧॥

શ્રવણેચ્છાશ્રુતાનાં ચ તદન્યેષાં સ્મૃતિર્યતઃ ।
સૈકપઞ્ચાશદધ્યાયસારભૂતાર્થમાલિકા ॥ ૫૨॥

તીર્ણા આશુ તરન્ત્યસ્માત્તરિષ્યન્ત્યઘતો નરાઃ ।
તીર્થં ગુરુચરિત્રાખ્યમવગાહ્યમિદં બુધૈઃ ॥ ૫૩॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતા
શ્રીગુરુસંહિતા(સમશ્લોકીગુરુચરિતા)ધ્યાયસારાવતરણિકા સમ્પૂર્ણા ।

*Shri Gurucharitra Adhyaya Saramsha Shlokas*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*